# बोर्ड कृतिपत्रिका: मार्च 2022

## आनन्दः (संयुक्त - संस्कृतम्)


**Time: 2 Hours** **Marks: 40**

**सूचना:**

(1) सूचनानुसारम् आकृतयः आरेखितव्याः।
(2) आकृतीनाम् आरेखनं मसीलेखन्या कर्तव्यम्।
(3) सर्वासु कृतिषु वाक्यानां पुनर्लेखनम् आवश्यकम्।
(4) लेखनं सुवाच्यं, स्पष्टं लेखननियमानुसारं च भवेत्।

### प्रथमः विभागः – सुगमसंस्कृतम् **(6)**

**1. (अ) चित्रं दृष्ट्वा नामानि लिखत। (4 तः 3)** **[3]**

(1)


(2)


(3)


(4)


**(आ) सङ्ख्याः अक्षरैः/अङ्कैः लिखत। (3 तः 2)** **[2]**

(1) पञ्चाशीतिः (2) १४ (3) त्रिंशत्।

**(इ) समय-स्तम्भमेलनं कुरुत।** **[1]**

| अ | आ |
|---|---|
| (1) पादोन-षड्वादनम् | ७.०० |
| (2) सप्तवादनम् | ६.१० |
| | ५.४५ |

### द्वितीयः विभागः – गद्यम् **(14)**

**2. (अ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत।** [4]

किञ्चित्कालानन्तरं शृगालः मृगम् अवदत्, 'वनेऽस्मिन् एकं सस्यपूर्णक्षेत्रमस्ति। दर्शयामि त्वाम्।' तथा कृते मृगः प्रत्यहं तत्र सस्यम् अखादत्। तद् दृष्ट्वा एकस्मिन् दिने क्षेत्रपतिना पाशः योजितः। तत्रागतः मृगः पाशैर्बद्धः। सः अचिन्तयत्, "इदानीं मित्राण्येव शरणं मम।" दूरात् तत् पश्यन् जम्बूकः मनसि आनन्दितः। सोऽचिन्तयत्, "फलितं मे मनोरथम्। इदानीं प्रभूतं भोजनं प्राप्स्यामि।" मृगस्तं दृष्ट्वा अब्रवीत्, "मित्र छिन्धि तावन्मम बन्धनम्। त्रायस्व माम्।" जम्बूको दूरादेवावदत्, "मित्र, दृढोऽयं बन्धः। स्नायुनिर्मितान् पाशानेतान् कथं वा व्रतदिवसे स्पृशामि?" इत्युक्त्वा सः समीपमेव वृक्षस्य पृष्ठतः निभृतं स्थितः।

प्रदोषकाले मृगमन्विष्यन् काकस्तत्रोपस्थितः। मृगं तथाविधं दृष्ट्वा स उवाच, "सखे! किमेतत्?" मृगेणोक्तम्, "सुहृद्वाक्यस्य अनादरात् बद्धोऽहम्।"

**(1) अवबोधनम्। (3 त: 2)** **2**

**(क) उचितं कारणं चित्वा वाक्यं पुनर्लिखत।** 1

जम्बूक: मनसि आनन्दित: यत: ________ ।

(1) मृग: पाशै: बद्ध:।

(2) जम्बूकस्य अन्येन सह मित्रता अभवत्।

**(ख) क: कं वदति?** 1

"वनेऽस्मिन् एकं सस्यपूर्णं क्षेत्रमस्ति।"

**(ग) एष: गद्यांश: कस्मात् पाठात् उद्धृत:?** 1

**(2) शब्दज्ञानम्। (3 त: 2)** **2**

**(क) गद्यांशात् 2 पूर्वकालवाचक-धातुसाधित-त्वान्त-अव्यये चित्वा लिखत।** 1

**(ख) गद्यांशात् विशेषण-विशेष्ययो: मेलनं कुरुत।** 1

| | विशेषणम् | विशेष्यम् |
|---|---|---|
| (1) | दृढ: | भोजनम् |
| (2) | प्रभूतम् | मित्रम् |
| | | बन्ध: |

**(ग) पूर्वपदं / उत्तरपदं लिखत।** 1

(1) इत्युक्त्वा = ________ + उक्त्वा।

(2) वनेऽस्मिन = वने + ________ ।

**(आ) गद्यांशं पठित्वा निर्दिष्टा: कृती: कुरुत।** [4]

पिता – अधुना इमं तण्डुलं विभज।

अर्णव: – तात, कियान् लघु: अस्ति एष:। पश्यतु, एतस्य भागद्वयं यथाकथमपि कृतं मया।

पिता – इतोऽपि लघुतर: भाग: कर्तुं शक्यते वा?

अर्णव: – यदि क्रियेत तर्हि चूर्णं भवेत् तस्य।

पिता – सम्यग् उक्तं त्वया। यत्र एतद् विभाजनं समाप्यते, यस्मात् सूक्ष्मतर: भाग: प्राप्तुं न शक्यते स: एव परम: अणु:।

अर्णव: – द्रव्यस्य अन्तिम: घटक: मूलं तत्त्वं च परमाणु: सत्यं खलु?

पिता – सत्यम्। अयं खलु कणादमहर्षे: सिद्धान्त:। अपि जानासि? परमाणु: द्रव्यस्य मूलकारणम् इति तेन महर्षिणा प्रतिपादितम्। तदपि प्राय: ख्रिस्तपूर्वं पञ्चमे षष्ठे वा शतके।

अर्णव: – तात, महर्षिणा कणादेन किं किम् उक्तं परमाणु विषये? वयं तु केवलं तस्य महाभागस्य नामधेयम् एव जानीम:।

पिता – कणादमुनिना प्रतिपादितम्–परमाणु: अतीन्द्रिय:, सूक्ष्म:, निरवयव:, नित्य:, स्वयं व्यावर्तक: च। 'वैशेषिकसूत्राणि' इति स्वग्रन्थे तेन परमाणो: व्याख्या कृता।

**(1) अवबोधनम्। (3 त: 2)** **2**

**(क) उचितं कारणं चित्वा वाक्यं पुनर्लिखत।** 1

(1) ________ द्रव्यस्य मूलकारणम्। (परमाणु: / विज्ञानं)

(2) ________ इमं तण्डुलं विभज। (अनन्तरं / अधुना)


**(ख) पूर्णवाक्येन उत्तरं लिखत।** 1

परमाणुसिद्धान्त: केन महर्षिणा कथित:?

**(ग) वाक्यं पुनर्लिखित्वा सत्यम्/असत्यम् इति लिखत।** 1

वयं तु केवलं तस्य महाभागस्य ग्रामम् एव जानीम:।

(2) **गद्यांशं पठित्वा जालरेखाचित्रं पूरयत।** **2**




**(इ) गद्यांशं पठित्वा सरलार्थं लिखत। (2 त: 1)** **[4]**

(1) सूत: – धृता: प्रग्रहा:। अवतरतु आयुष्मान्।

दुष्यन्त: – (अवतीर्य) सूत, विनीतवेषेण प्रवेष्टव्यानि तपोवनानि नाम। इदं तावत् गृह्यताम्। (इति सूतस्याभरणानि धनुश्चोपनीय) सूत, यावदाश्रमवासिन: दृष्ट्वाऽहमुपावर्ते तावदार्द्रपृष्ठा: क्रियन्तां वाजिन:।

सूत: – तथा। (इति निष्क्रान्त:।)

(2) कर्ण: – तेन हि जित्वा पृथ्वीं ददामि।

शक्र: – पृथिव्या किं करिष्यामि। नेच्छामि कर्ण, नेच्छामि।

कर्ण: – अथवा मच्छिरो ददामि।

शक्र: – अविहा। अविहा।

कर्ण: – न भेतव्यम् न भेतव्यम्। अन्यदपि श्रूयताम्। अङ्गै: सहैव जनितं कवचं कुण्डलाभ्यां सह ददामि।

शक्र: – (सहर्षम्) ददातु, ददातु।

**(ई) माध्यमभाषया उत्तरं लिखत। (2 त: 1)** **[2]**

(1) भूमाता पृथुवैन्यं किम् उपादिशत्?

(2) शङ्करेण संन्यासार्थं कथम् अनुमति: लब्धा?

**तृतीय: विभाग:- पद्यम्।** **(10)**

**3. (अ) पद्यांशं पठित्वा निर्दिष्टा: कृती: कुरुत। (5 त: 4)** **[4]**

वैद्यराज नमस्तुभ्यं यमराजसहोदर।
यमस्तु हरति प्राणान् त्वं तु प्राणान् धनानि च।।

मनुजा वाचनेनैव बोधन्ते विषयान् बहून्।
दक्षा भवन्ति कार्येषु वाचनेन बहुश्रुता:।।

यादृशं वपते बीजं क्षेत्रमासाद्य कर्षक:।
सुकृते दुष्कृते वाऽपि तादृशं लभते फलम्।।

विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनम्
विद्या भोगकरी यश: सुखकरी विद्या गुरूणां गुरु:।

विद्या बन्धुजनो विदेशगमने विद्या परं दैवतम्
विद्या राजसु पूज्यते न तु धनं विद्याविहीन: पशु:।।

(क) **पूर्णवाक्येन उत्तरं लिखत।** 1

यमः किं हरति?

(ख) **विशेषण-विशेष्ययोः मेलनं कुरुत।** 1

| | **विशेषणम्** | **विशेष्यम्** |
|---|---|---|
| (1) | दक्षाः | विषयान् |
| (2) | बहून् | वाचनम्: |
| | | मनुजाः |

(ग) **जालरेखाचित्रं पूरयत।** 1

**विद्या**
- प्रच्छन्नगुप्तं धनम्।
- गुरूणां ________ ।
- परं दैवतम्।
- नरस्य अधिकं________ ।

(घ) **पद्यांशात् २ द्वितीयाविभक्त्यन्तपदे लिखत।** 1

(च) **पूर्वपदं / उत्तरपदं लिखत।** 1

(1) वाचनेनैव = ________ + एव।

(2) क्षेत्रमासाद्य = क्षेत्रम् + ________।

(आ) **पद्ये शुद्धे पूर्णे च लिखत। (3 तः 2)** **[4]**

(1) रामाभिषेके ...................... ठं ठठं ठः।।

(2) तावत् भयाद्धि ...................... यथोचितम्।।

(3) आत्मनो ...................... सर्वार्थ साधनम्।।

(इ) **माध्यमभाषया सरलार्थं लिखत। (2 तः 1)** **[2]**

(1) शीलं सद्गुणसम्पत्तिः ज्ञानं विज्ञानमेव च।
उत्साहो वर्धते येन वाचनं तद् हितावहम्।

(2) वाचनं ज्ञानदं बाल्ये तारुण्ये शीलरक्षकम्।
वार्धक्ये दुःखहरणं हितं सद्ग्रन्थवाचनम् ।।

## चतुर्थः विभागः- भाषाभ्यासः। **(10)**

**4.** (अ) **पृथक्करणम्।** **[4]**

(1) **मञ्जूषातः नामानि सर्वनामानि च पृथक्कुरुत। (5 तः 4)** 2

| **नाम** | **सर्वनाम** |
|---|---|
| | |

(**मञ्जूषा** – त्वम्, मनसा, बाल्ये, कस्मै, गृहम्)

(2) **मञ्जूषातः क्रियापदानि धातुसाधित-विशेषणानि च पृथक्कुरुत। (5 तः 4)** 2

| **क्रियापदम्** | **धातुसाधित-विशेषणम्** |
|---|---|
| | |

(**मञ्जूषा** – खादन्ति, पूजितः, मुक्तः, लभते, भेतव्यम्)

**(आ) निर्दिष्टाः कृतीः कुरुत। (4 तः 2)** **[4]**

**(1) सङ्ख्या / क्रम / आवृत्तिवाचकस्य योग्यं पर्यायं चित्वा वाक्यं पुनर्लिखत। (3 तः 2)** 2

(क) भगवता व्यासेन ........................ पुराणानि रचितानि (अष्टादश / अष्टादशः)

(ख) आर्यभट्टः इति भारतवर्षेण प्रेषितः ........................ उपग्रहः। (प्रथमः/एकस्मिन्)

(ग) छात्रः दिनस्य ........................ अध्ययनं करोति। (द्वे/द्विवारम्)

**(2) समासविग्रहाणां समासनामभिः सह मेलनं कुरुत। (6 तः 4)** 2

| **समासविग्रहः** | **समासनाम** |
|---|---|
| (1) विविधानि बीजानि | (अ) नञ्-तत्पुरुषः। |
| (2) दिने दिने | (आ) बहुव्रीहिः। |
| (3) लगुडं हस्ते यस्य सः | (इ) कर्मधारयः। |
| (4) न इच्छा | (ई) इतरेतर-द्वन्द्वः। |
| (5) चिन्तायां मग्ना | (उ) अव्ययीभावः। |
| (6) कवयः च पण्डिताःच | (ऊ) सप्तमी-तत्पुरुषः। |

**(3) मञ्जूषातः समानार्थकशब्दान्/विरुद्धार्थकशब्दान् चित्वा लिखत।** 2

(1) राजा = ..........................। (2) पुरतः × ..........................।

(3) पादः = ..........................। (4) सुकृतम् × ..........................।

(**मञ्जूषा** – पृष्ठतः, दुष्कृतम्, चरणः, नृपः)

**(4) योग्यं पर्यायं चिनुत। (3 तः 2)** 2

(1) बालकः अन्यशास्त्राणि अधीतवान्। (कर्तृवाच्यम् / कर्मवाच्यम्)

(2) त्वं धनुः....................। (त्यज / त्यजतु)

(3) उद्याने .................... वृक्षाः सन्ति। (विस्तीर्णः / विस्तीर्णाः)

**(इ) विशिष्ट-विभक्तेः उपयोगं कृत्वा वाक्यनिर्माणं कुरुत। (4 तः 2)** **[2]**

(1) स्निह् (4 प.प.) (2) विना

(3) रुच् (1 आ.प.) (4) कृते